# संस्कृत-वार्ता:

दिनाङ्कः-27.10.2025 सायम् - 06:20

आदौ मुख्यवार्ता

- रक्षामंत्री राजनाथसिंहः अद्य देशस्य रक्षा-उत्पादने निजीक्षेत्रस्य वर्धमानां सहभागितां प्रकाशयन् अवदत् यत् भारतस्य रक्षा-निर्यातः अधुना सार्द्धत्रयोविंशति कोटिरूप्यकाणि अभवत्।
- छत्तीसगढस्य काङ्केर्-मण्डले एकविंशतिः माओवादिनः स्वशस्त्रैः सह आत्मसमर्पणं कृतवन्तः एतेषु माओवादिषु त्रयोदशजनाः वरिष्ठा: कार्यकर्तारः आसन्।
- सर्वोच्चन्यायालयेन अद्य सर्वेभ्यः राज्येभ्यः केन्द्रशासितप्रदेशेभ्यः च सूचनाः प्रदत्ताः, यस्मिन् आभासीय- निगडन-भ्रष्टाचारैः सम्बद्धानां पञ्जीकृतानां एफ्. आई. आर्. इति प्रथम-सूचना-प्रतिवेदनानां विवरणं याचितम्।
- छठ-पूजायाम् अद्य तृतीये दिने श्रद्धालव: अस्तंगताय सूर्याय सन्ध्या-अर्घ्यं समर्पयन्ति।
- मोन्था-चक्रवातः बङ्गाल-खात्यां चेन्नई-नगरात् षष्ठ्योत्तर पञ्चशतं यावत् कि. मी. दक्षिणपूर्वदिशि स्थितः अस्ति।

---

<u>रक्षामंत्री राजनाथसिंहः</u>

रक्षामंत्री राजनाथसिंहः अद्य देशस्य रक्षा-उत्पादने निजीक्षेत्रस्य वर्धमानां सहभागितां प्रकाशयन् अवदत् यत् भारतस्य रक्षा-निर्यातः अधुना सार्द्धत्रयोविंशति कोटिरूप्यकाणि अभवत्। नवदिल्ल्यां एस्. आई. डि. एम्. इत्यस्य वार्षिकसम्मेलनं सम्बोधयन्, मन्त्रिणा उक्तं यत् विगतदशके देशस्य आन्तरिक-रक्षा-उत्पादनं सार्धैक लक्षकोटिरूप्यकाणि यावत् वर्धितम् तथा च अस्मिन् निजीक्षेत्राणां त्रयस्त्रिंशत् सहस्रकोटिरूप्यकाणां योगदानम् अस्ति।

आपरेशन् सिन्दूरस्य सफलतायाः प्रशंसां कुर्वन्, मन्त्रिणा नवान्वेषणस्य, विन्यासस्य, निर्माणस्य च क्षेत्रेषु उद्योग-जगतः-योद्धृणां कार्यस्य प्रशंसा कृता।

---------------------------------------------------

**केन्द्रीय-गृह-मन्त्री अमितशाहः**

केन्द्रीय-गृह-मन्त्री अमितशाहः अद्य सूचितवान् यत् छत्तीसगढस्य काङ्केर्-मण्डले एकविंशतिः माओवादिनः स्वशस्त्रैः सह आत्मसमर्पणं कृतवन्तः। सामाजिकान्तर्जालीयपटले श्रीशाहः अवदत् यत् एकविंशति माओवादिषु त्रयोदशजनाः वरिष्ठ-कार्यकर्तारः आसन्। षड्विंशत्यधिक द्विसहस्रतम वर्षस्य मार्च्-मासस्य एकत्रिंशत् दिनाङ्कपर्यन्तं नक्सलवादस्य उन्मूलनाय स्व संकल्पस्य विषये प्रवदन्, मन्त्रिणा, अद्यापि उक्तं यत् अन्येपि माओवादिनः यथाशीघ्रम् आत्मसमर्पणं कुर्वन्तु इति।

---------------------------------------------------

**सर्वोच्चन्यायालयः**

सर्वोच्चन्यायालयेन अद्य सर्वेभ्यः राज्येभ्यः केन्द्रशासितप्रदेशेभ्यः च सूचनाः प्रदत्ताः, यस्मिन् आभासीय-निगडन-भ्रष्टाचारैः सम्बद्धानां पञ्जीकृतानां एफ्. आई. आर्. इति प्रथम-सूचना-प्रतिवेदनानां विवरणं याचितम्। सर्वोच्चन्यायालयेन एतेषां सर्वेषाम् प्रकरणानां अन्वेषणाय सीबीआई इति केन्द्रीय-अन्वेषण-अभिकरणाय समर्पयितुं अपि विचारः कृतः।

---------------------------------------------------

**छठ-पूजा**

छठ-पूजायाम् अद्य तृतीये दिने श्रद्धालवः अस्तंगताय सूर्याय सन्ध्या-अर्घ्यं समर्पयन्ति। सूर्यः सम्पूर्णे दिने यत् प्रकाशं, उष्णता, ऊर्जां च प्रददाति तस्यैव कृते कृतज्ञताऽर्पणाय क्षणः अस्ति। अस्मिन् अवसरे, भक्ताः नदीतीरेषु अथवा जलाशयेषु समागच्छन्ति, पारम्परिकेन वेणुदण्डेन निर्मितं प्रसादेण पूरितं च पात्रं वहन्ति, अस्तमानाय

सूर्याय प्रणमन्ति, स्वसन्ततीनां परिवारस्य च समृद्धेः कल्याणस्य च प्रार्थनां कुर्वन्ति। राष्ट्रपतिः द्रौपदी मुर्मुः, उपराष्ट्रपतिः सी.पी. राधाकृष्णन् वर्यः, प्रधानमन्त्री नरेन्द्रमोदी च अस्मिन् अवसरे नागरिकानाम् अभिवादनं कृतवन्तः।

---

<u>राष्ट्रपतिः द्रौपदी मुर्मुः</u>

राष्ट्रपतिः द्रौपदी मुर्मुः अद्य भारतस्य पूर्वराष्ट्रपतेः के. आर्. नारायणन् वर्यस्य जन्मदिवसावसरे राष्ट्रपतिभवने तस्मै पुष्पांजलिम् अर्पितवती।

---

<u>राष्ट्रपतिः आईएएस</u>

राष्ट्रपतिः द्रौपदी मुर्मुः वर्या अद्य प्रोक्तवती यत् विकासित्-भारतस्य निर्माणे युवाधिकारिणां नेतृत्वे भविष्ये सज्जः आरक्षिबलं प्रमुखां भूमिकां निर्वहिष्यति। राष्ट्रपतिः नवदिल्ल्यां भारतीय-आरक्षक-सेवायाः सप्तसप्तति तमस्य राष्ट्रिय राइफल्स इत्यस्य चतुर्विंशत्यधिक द्विसहस्रतम वर्षस्य परिवीक्षाधीनः अधिकारिणः सम्बोधयन्ती इदमुक्तवति। सा अवोचत् यत् ये युवः अधिकारिणः शीघ्रमेव अधिकारस्य पदेषु अधिगमिष्यन्ति ते मनसि स्थापयेयुः यत् अधिकारेण सह उत्तरदायित्वम् आगच्छति ।

---

<u>जे. पी. नड्डा</u>

केन्द्रीय-स्वास्थ्य-परिवार-कल्याण-मन्त्री जे. पी. नड्डाः अद्य प्रशासनस्य प्रत्येकस्तरे नैतिकाचरणं संस्थागतकरणाय, जागरूकतायाः संस्कृतेः निर्माणस्य च महत्त्वम् अधोरेखितवान्। नवदिल्ल्यां सतर्कता-जागृति-सप्ताहस्य अवसरे मन्त्रालयस्य वरिष्ठान् अधिकारिणः कर्मचारिणः च सम्बोधयन् श्री. नड्डाः एतत् उक्तवान्। सः अवदत् यत् कर्तव्याणाम् अकर्तव्याणां च सूचीं

सरलतया, सामान्यभाषया सज्जीकर्तव्यम्, येन जनाः सद्भावनया अनुकम्पया वा किमपि अशुभं न करिष्यन्ति।

-----------------------------------------------------

## इसरो

भारतीय-अन्तरिक्ष-अनुसन्धान-सङ्गठनेन, एल्. वि. एम्. 3 इति प्रक्षेपणयानम् श्रीहरिकोटायाः सतीश-धवन्-अन्तरिक्ष-केन्द्रस्य प्रक्षेपणकेन्द्रे स्थानान्तरितम्। सि. एम्. एस्.3 इति सम्प्रेषण-उपग्रहेण सह सम्पूर्णतया संयोजितं एकीकृतं च एतत् प्रक्षेपणयानम् अस्ति, यत् नवम्बरमासस्य द्वितीये दिनाङ्के प्रक्षेपितं भविष्यति।

-----------------------------------------------------

## शिवराजसिंह-चौहानः

केन्द्रीयकृषि-कृषक-कल्याण-मन्त्री शिवराजसिंह-चौहानः, भारतीयकृषि-अनुसन्धान-परिषदं, आई. सी. ए. आर्. इत्यस्मै, कृषि-शिक्षायाः उन्नत्यै सर्वाणि रिक्तस्थानानि तत्क्षणमेव पूरयितुं आदिष्टवान्। अद्य नवदिल्ल्यां राष्ट्रिय-कृषि-छात्र-सम्मेलनम् अभिसंबोधयन् मन्त्रिणा इदमुक्तम् ।

-----------------------------------------------------

## निर्वाचन-आयोग:

निर्वाचन-आयोगेन अद्य घोषितं यत् द्वितीय चरणस्य अन्तर्गतं द्वादश राज्येषु केन्द्रशासितप्रदेशेषु च मतदातृ-सूच्यां विशेष-गहन-संशोधनम् क्रियते। अद्य नवदिल्ल्यां वार्ताहरान् सम्बोधयन् मुख्य-निर्वाचन-आयुक्तः ज्ञानेश-कुमारः अवदत् यत् अस्य संशोधनस्य उद्देश्यं मतदातृ-सूचीं इतोप्यधिका पारदर्शिका, दोषमुक्ता च कर्तुम् अस्ति। सः अवदत् यत् द्वितीयस्य चरणस्य अन्तर्गतं एस्. आई. आर्. इत्यस्य सञ्चालनं चरणबद्धरूपेण भविष्यति इति।

निर्वाचनायोगः इत्यपि अघोषयत् यत्र यत्र एस्.आई.आर् पुनरीक्षणं भविष्यति तेषु सर्वेषु द्वादश राज्येषु केन्द्रशासितप्रदेशेषु च मतदातृ-सूचयः अद्य मध्यरात्रौ स्थगिताः भविष्यन्ति इति। सः अवदत् यत् एतेषु राज्येषु केन्द्रशासितप्रदेशेषु च (बी. एल्. ओ.) इति बूथ्-स्तरीय-अधिकारिणः विद्यमान-मतदातृभ्यः विशिष्ट-गणना-प्रपत्राणि पूरयितुं वितरिस्यन्ति।

------------------------------------------------------

**मोन्था-चक्रवातः**

मोन्था-चक्रवातः, बङ्गाल-खात्यां चेन्नई-नगरात् षष्ठ्योत्तर पञ्चशतं यावत् कि. मी. दक्षिणपूर्वदिशि स्थितः अस्ति। भारतीय-राष्ट्रिय-महासागर- सूचना-सेवा-केन्द्रस्य अन्तिम प्राप्त-सूचनानुसारं, अग्रिमेषु द्वादश होरासु पश्चिममध्य-बङ्गाल-खात्याः उपरि पश्चिम-वायव्यदिशं निरन्तरं गमनस्य सम्भावना विद्यते, ततः परं श्वः तीव्र-चक्रवात-रूपेण भविष्यति।

।। इति वार्ताः ।।